# ॥ વાસુદેવોપનિષત્ ॥

.. Vasudeva Upanishad ..

sanskritdocuments.org

September 11, 2017

.. Vasudeva Upanishad ..

॥ વાસુદેવોપનિષત્ ॥

# Sanskrit Document Information

Text title : Vasudeva Upanishad

File name : vasudeva.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)

Proofread by : Sunder Hattangadi (sunderh at hotmail.com)

Description-comments : 56 /108; Sama Veda - Vaishnava upanishad

Latest update : Mar. 20, 2000

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

(સામવેદીય)

યત્સર્વહૃદયાગારં યત્ર સર્વં પ્રતિષ્ઠિતમ્ ।
વસ્તુતો યન્નિરાધારં વાસુદેવપદં ભજે ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં
માહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણમ-
સ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે
મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

(ઊર્ધ્વપુણ્ડ્રવિધિજિજ્ઞાસા)

ૐ નમસ્કૃત્ય ભગવાન્નારદઃ સર્વેશ્વરં વાસુદેવં પપ્રચ્છ
અધીહિ ભગવન્નૂર્ધ્વપુણ્ડ્રવિધિં દ્રવ્યમન્ત્રસ્થાનાદિસહિતં મે
બ્રૂહીતિ ।

(ગોપીચન્દનસ્વરૂપમ્)

તં હોવાચ ભગવાન્વાસુદેવો વૈકુણ્ઠસ્થાનાદુત્પન્નં
મમ પ્રીતિકરં મદ્ભક્તૈર્બ્રહ્માદિભિર્ધારિતં વિષ્ણુચન્દનં
મમાઙ્ગે પ્રતિદિનમાલિપ્તં ગોપીભિઃ પ્રક્ષાલનાદ્ગોપીચન્દન-
માખ્યાતં મદઙ્ગલેપનં પુણ્યં ચક્રતીર્થાન્તઃસ્થિતં
ચક્રસમાયુક્તં પીતવર્ણં મુક્તિસાધનં ભવતિ ।

(ગોપીચન્દનોદ્ધારધારણયોર્વિધાનમ્)

અથ ગોપીચન્દનં નમસ્કૃત્વોદ્ધૃત્ય ।
ગોપીચન્દન પાપઘ્ન વિષ્ણુદેહસમુદ્ભવ ।
ચક્રાઙ્કિત નમસ્તુભ્યં ધારણાન્મુક્તિદો ભવ ।
ઇમં મે ગઙ્ગે ઇતિ જલમાદાય વિષ્ણોર્નુકમિતિ મર્દયેત્ ।
અતો દેવા અવન્તુ ન ઇત્યેતન્મન્ત્રૈર્વિષ્ણુગાયત્ર્યા કેશવાદિ-
નામભિર્વા ધારયેત્ ।

(બ્રહ્મચાર્યાદીનાં ધારણાપ્રકારઃ)

બ્રહ્મચારી વાનપ્રસ્થો વા
લલાટહૃદયકણ્ઠબાહૂમૂલેષુ વૈષ્ણવગાયત્ર્યા
કૃષ્ણાદિનામભિર્વા ધારયેત્ । ઇતિ ત્રિવારમભિમન્ત્ર્ય
શઙ્ખચક્રગદાપાણે દ્વારકાનિલયાચ્યુત । ગોવિન્દ
પુણ્ડરીકાક્ષ રક્ષ માં શરણાગતમ્ । ઇતિ ધ્યાત્વા
ગૃહસ્થો લલાટાદિદ્વાદશસ્થલેષ્વનામિકાઙ્ગુલ્યા
વૈષ્ણવગાયત્ર્યા કેશવાદિનામભિર્વા ધારયેત્ ।
બ્રહ્મચારી ગૃહસ્થો વા લલાટહૃદયકણ્ઠબાહૂમૂલેષુ
વૈષ્ણવગાયત્ર્યા કૃષ્ણાદિનામભિર્વા ધારયેત્ ।
યતિસ્તર્જન્યા શિરોલલાટહૃદયેષુ પ્રણવેનૈવ ધારયેત્ ।

(ત્રિપુણ્ડ્રસ્ય ત્રિમૂર્ત્યાદિરૂપત્વમ્)

બ્રહ્માદયસ્ત્રયો મૂર્તયસ્તિસ્રો વ્યાહૃતયસ્ત્રીણિ છન્દાંસિ
ત્રયોઽગ્નય ઇતિ જ્યોતિષ્મન્તસ્ત્રયઃ કાલાસ્તિસ્રોઽવસ્થાસ્ત્રય
આત્માનઃ પુણ્ડ્રાત્રય ઊર્ધ્વા અકાર ઉકારો મકાર એતે
પ્રણવમયોર્ધ્વપુણ્ડ્રાસ્તદાત્મા સદેતદોમિતિ । તાનેકધા
સમભવત્ । ઊર્ધ્વમુન્નમયત ઇત્યોઙ્કારાધિકારી ।
તસ્માદૂર્ધ્વપુણ્ડ્રં ધારયેત્ । પરમહંસો લલાટે
પ્રણવેનૈકમૂર્ધ્વપુણ્ડ્રં વા ધારયેત્ ।

(વાસુદેવધ્યાનપ્રકારઃ)

તત્ત્વપ્રદીપપ્રકાશં સ્વાત્માનં પશ્યન્યોગી
મત્સાયુજ્યમવાપ્નોતિ । અથ વા ન્યસ્તહૃદયપુણ્ડ્રમધ્યે
વા હૃદયકમલમધ્યે વા ।
તસ્ય મધ્યે વહ્નિશિખા અણીયોર્ધ્વા વ્યવસ્થિતા ।
નીલતોયદમધ્યસ્થાદ્વિદ્યુલ્લેખેવ ભાસ્વરા ।
નીવારશૂકવત્તન્વી પરમાત્મા વ્યવસ્થિત ઇતિ ।
અતઃ પુણ્ડ્રસ્થં હૃદયપુણ્ડરીકેષુ તમભ્યસેત્ ।
ક્રમાદેવં સ્વાત્માનં ભાવયેન્માં પરં હરિમ્ ।
એકાગ્રમનસા યો માં ધ્યાયતે હરિમવ્યયમ્ ।
હૃત્પઙ્કજે ચ સ્વાત્માનં સ મુક્તો નાત્ર સંશયઃ ।
મદ્રૂપમદ્વયં બ્રહ્મ આદિમધ્યાન્તવર્જિતમ્ ।

स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम् ।

(वासुदेवस्य सर्वात्मत्वम्)

એકો વિષ્ણુરનેકેષુ જઙ્ગમસ્થાવરેષુ ચ ।
અનુસ્યુતો વસત્યાત્મા ભૂતેષ્વહમવસ્થિતઃ ।
તૈલં તિલેષુ કાષ્ઠેષુ વહ્નિઃ ક્ષીરે ઘૃતં યથા ।
ગન્ધઃ પુષ્પેષુ ભૂતેષુ તથાત્માવસ્થિતો હ્યહમ્ ।

(બાસુદેવધ્યાનસ્થાનેષુ ગોપીચન્દનધારણમ્)

બ્રહ્મરન્ધ્રે ભ્રુવોર્મધ્યે હૃદયે ચિદ્રવિં હરિમ્ ।
ગોપીચન્દનમાલિપ્ય તત્ર ધ્યાત્વાપ્નુયાત્પરમ્ ।
ઊર્ધ્વદણ્ડોર્ધ્વરેતાશ્ચ ઊર્ધ્વપુણ્ડ્રોર્ધ્વયોગવાન્ ।
ઊર્ધ્વં પદમવાપ્નોતિ યતિરૂર્ધ્વચતુષ્કવાન્ ।
ઇત્યેતન્નિશ્ચિતં જ્ઞાનં મદ્ભક્ત્યા સિધ્યતિ સ્વયમ્ ।
નિત્યમેકાગ્રભક્તિઃ સ્યાદ્ગોપીચન્દનધારણાત્ ।

(ગોપીચન્દનભસ્મનોર્ધારણવિધિઃ)

બ્રાહ્માણાનાં તુ સર્વેષાં વૈદિકાનામનુત્તમમ્ ।
ગોપીચન્દનવારિભ્યામૂર્ધ્વપુણ્ડ્રં વિધીયતે ।
યો ગોપીચન્દનાભાવે તુલસીમૂલમૃત્તિકામ્ ।
મુમુક્ષુર્ધારયેન્નિત્યમપરોક્ષાત્મસિદ્ધયે ।
અતિરાત્રાગ્નિહોત્રભસ્મનાગ્નેર્ભસિતમિદંવિષ્ણુસ્ત્રીણિ
પદેતિ મન્ત્રૈર્વૈષ્ણવગાયત્ર્યા પ્રણવેનોદ્ધૂલનં કુર્યાત્ ।
એવં વિધિના ગોપીચન્દનં ચ ધારયેત્ ।
યસ્ત્વધીતે વા સ સર્વપાતકેભ્યઃ પૂતો ભવતિ ।
પાપબુદ્ધિસ્તસ્ય ન જાયતે । સ સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ ।
સ સર્વૈર્યજ્ઞૈર્યાજિતો ભવતિ । સ સર્વૈર્દેવૈઃ પૂજ્યો ભવતિ ।
શ્રીમન્નારાયણે મય્યચઞ્ચલા ભક્તિશ્ચ ભવતિ ।
સ સમ્યગ્જ્ઞાનં ચ લબ્ધ્વા વિષ્ણુસાયુજ્યમવાપ્નોતિ ।
ન ચ પુનરાવર્તતે ન ચ પુનરાવર્તતે ઇત્યાહ ભગવાન્વાસુદેવઃ ।
યસ્ત્વેતદ્વાધીતે સોઽપ્યેવમેવ ભવતીત્યોં સત્યમિત્યુપનિષત્ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો

બલમિદ્રિયાણિ ચ ॥ સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં બ્રહ્મ
નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકણં મેસ્તુ
તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ વાસુદેવોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi (sunderh@hotmail.com)

---

.. Vasudeva Upanishad ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*